श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीशङ्कराचार्य विरचितम्

# ॥ श्रीकनकधारास्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीकनकधारास्तोत्रम् ॥

अङ्गं हरेः पुलक भूषणमाश्रयन्ती
  भृङ्गाङ्गनेव मुकुलाभरणं तमालम्।
अङ्गीकृताखिलविभूतिरपाङ्गलीला
  माङ्गल्यदाऽस्तु मम मङ्गळदेवतायाः ॥ 1 ॥

मुग्धा मुहुर्विदधती वदने मुरारेः
  प्रेमत्रपाप्रणिहितानि गतागतानि।
माला दृशोर्मधुकरीव महोत्पले या
  सा मे श्रियं दिशतु सागरसंभवायाः ॥ 2 ॥

आमीलिताक्षमधिगम्य मुदा मुकुन्दं
  आनन्दकन्दमनिमेषमनङ्गतन्त्रम्।
आकेकरस्थितकनीनिकपक्ष्मनेत्रं
  भूत्यै भवेन्मम भुजङ्गशयाङ्गनायाः ॥ 3 ॥

बाह्वन्तरे मधुजितः श्रितकौस्तुभे या
  हारावळीव हरिनीलमयी विभाति।
कामप्रदा भगवतोऽपि कटाक्षमाला
  कल्याणमावहतु मे कमलालयायाः ॥ 4 ॥

कालाम्बुदाळि ललितोरसि कैटभारेः
  धाराधरे स्फुरति या तडिदङ्गनेव।
मातुस्समस्तजगतां महनीयमूर्तिः
  भद्राणि मे दिशतु भार्गवनन्दनायाः ॥ 5 ॥

प्राप्तं पदं प्रथमतः खलु यत्प्रभावात्
माङ्गल्यभाजि मधुमाथिनि मन्मथेन।
मय्यापतेत्तदिह मन्थरमीक्षणार्धं
मन्दालसं च मकरालय कन्यकायाः॥ 6॥

विश्वामरेन्द्र पदविभ्रमदानदक्षं
आनन्दहेतुरधिकं मुरविद्विषोऽपि।
ईषन्निषीदतु मयि क्षणमीक्षणार्द्धम्
इन्दीवरोदरसहोदरमिन्दिरायाः॥ 7॥

इष्टा विशिष्टमतयोऽपि यया दयार्द्र
दृष्ट्या त्रिविष्टपपदं सुलभं लभन्ते।
दृष्टिः प्रहृष्टकमलोदर दीप्तिरिष्टां
पुष्टिं कृषीष्ट मम पुष्कर विष्टरायाः॥ 8॥

दद्याद्दयानुपवनो द्रविणाम्बुधारां
अस्मिन्नकिञ्चनविहङ्गशिशौ विषण्णे।
दुष्कर्मघर्ममपनीय चिराय दूरं
नारायणप्रणयिनी नयनाम्बुवाहः॥ 9॥

गीर्देवतेति गरुडध्वजसुन्दरीति
शाकम्भरीति शशिशेखरवल्लभेति।
सृष्टिस्थितिप्रलय केळिषु संस्थितायै
तस्यै नमस्त्रिभुवनैक गुरोस्तरुण्यै॥ 10॥

श्रुत्यै नमोऽस्तु शुभकर्मफलप्रसूत्यै
रत्यै नमोऽस्तु रमणीय गुणार्णवायै।
शक्त्यै नमोऽस्तु शतपत्रनिकेतनायै
पुष्ट्यै नमोऽस्तु पुरुषोत्तम वल्लभायै॥ 11॥

नमोऽस्तु नाळीक निभाननायै
नमोऽस्तु दुग्धोदधि जन्मभूम्यै।
नमोऽस्तु सोमामृत सोदरायै
नमोऽस्तु नारायण वल्लभायै॥ **12** ॥

नमोऽस्तु हेमाम्बुजपीठिकायै
नमोऽस्तु भूमण्डलनायिकायै।
नमोऽस्तु देवादि दयापरायै
नमोऽस्तु शार्ङ्गायुध वल्लभायै॥ **13** ॥

नमोऽस्तु देव्यै भृगुनन्दनायै
नमोऽस्तु विष्णोरुरसि स्थितायै।
नमोऽस्तु लक्ष्म्यै कमलालयायै
नमोऽस्तु दामोदर वल्लभायै॥ **14** ॥

नमोऽस्तु कान्त्यै कमलेक्षणायै
नमोऽस्तु भूत्यै भुवन प्रसूत्यै।
नमोऽस्तु देवादिभिरर्चितायै
नमोऽस्तु नन्दात्मज वल्लभायै॥ **15** ॥

सम्पत्कराणि सकलेन्द्रियनन्दनानि
साम्राज्यदान विभवानि सरोरुहाक्षि।
त्वद्वन्दनानि दुरिताहरणोद्यतानि
मामेव मातरनिशं कलयन्तु मान्ये॥ **16** ॥

यत्कटाक्षसमुपासनाविधिः
सेवकस्य सकलार्थसंपदः।
संतनोति वचनाङ्गमानसैः
त्वां मुरारिहृदयेश्वरीं भजे॥ **17** ॥

सरसिजनिलये सरोजहस्ते
धवळतमांशुकगन्धमाल्य शोभे।
भगवति हरिवल्लभे मनोज्ञे
त्रिभुवनभूतिकरि प्रसीद मह्यम्॥ 18॥

दिग्घस्तिभिः कनककुंभमुखावसृष्ट
स्वर्वाहिनी विमलचारुजलाप्लुताङ्गीम्।
प्रातर्नमामि जगतां जननीमशेष
लोकाधिनाथगृहिणीममृताब्धिपुत्रीम्॥ 19॥

कमले कमलाक्षवल्लभे त्वं
करुणापूरतरङ्गितैरपाङ्गैः।
अवलोकय मामकिञ्चनानां
प्रथमं पात्रमकृत्रिमं दयायाः॥ 20॥

स्तुवन्ति ये स्तुतिभिरमीभिरन्वहं
त्रयीमयीं त्रिभुवनमातरं रमाम्।
गुणाधिका गुरुतर भाग्य भागिनो
भवन्ति ते भुवि बुधभाविताशयाः॥ 21॥

॥ इति श्रीकनकधारास्तोत्रं समाप्तम्॥